अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-603**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**
**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : षष्ठम्)**
**तृतीयपत्रम् – संस्कृत साहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम्** : इदं प्रश्नपत्रं सप्ततेः (70) अङ्कानां विद्यते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## (खण्ड – क) 25 अङ्काः

**प्रश्नः1– अधोलिखितेषु केषाञ्चन त्रयाणामलङ्काराणां संगतिनिर्देशपूर्वकं लक्षणोदाहरणे लिखत।** (3X5=15)
परिकरः। पर्यायः। व्याजस्तुतिः। विनोक्तिः। वक्रोक्तिः।

**प्रश्नः2– अधोलिखितेषूदाहरणेषु कयोश्चिद् द्वयोः सङ्गतिनिर्देशपूर्वकमलङ्कारनिर्देशः कार्यः –** (2X5=10)

**(क)** गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ।
करूणाविमुखेन मृत्युना
हरतां त्वां वद किन्न मे हृतम्।।

**(ख)** तदा भगवता तेन दृष्टिं दत्त्वा रणाङ्गणे।
गृहीतं जीवितं तेषामचिरात् परिपन्थिनाम्।।

**(ग)** जगाद वदनच्छद्मपद्मपर्यन्तपातिनः।
नयन् मधुलिहः श्वैत्यमुदग्रदशनांशुभिः।।

**(घ)** मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ।।

## (खण्ड – ख) 20 अङ्काः

**प्रश्नः3– अधोलिखितेष्वंशेषु केषाञ्चन त्रयाणां विवेचनात्मक व्याख्यानं कुरुत –** (3X5=15)

**(क)** तत्र बुद्धिमान्नास्तिक्यबुद्धिं जह्याद् विचिकित्सां च, प्रत्यक्षं ह्यल्पम्, अनपमप्रत्यक्षमस्ति, यदागमानुमानयुक्तिभिरुपलभ्यते। यैरेव तावदिन्द्रियैः प्रत्यक्षमुपलभ्यते तान्येव सन्ति चाप्रत्यक्षाणि। सताञ्च रूपाणामतिसन्निकर्षादतिविप्रकर्षादावरणात् करणदौर्बल्यान्मनोऽनवस्थानात् समानाभिहाराद-भिभवादतिसौक्ष्म्याच्च प्रत्यक्षानुपलब्धिः।

**(ख)** सर्वश्चेत् सञ्चरेन्मातुः पितुर्वा मरणं भवेत्।
निरन्तर नावयवः कश्चित् सूक्ष्मस्य चात्मनः।।

**(ग)** तस्मान्मतिं विमुच्यैताममार्गप्रसृतां बुधः।
सतां बुद्धिप्रदीपेन पश्येत् सर्वं यथातथम्।।

**(घ)** मन्थमन्थनमन्थानसंयोगादग्निसंभवः।
युक्तियुक्ता चतुष्पादसम्पद् व्याधिनिबर्हणी।।

(ङ) अत एवानुमीयते यत् स्वकृतमपरिहार्यमविनाशि पौर्वदैहिकं दैवसंज्ञकमानुबन्धिकं कर्म, तस्यैतत् फलम्, इतश्चान्यद् भविष्यति, इति फलाद् बीजमनुमीयते फलञ्च बीजात्। युक्तिश्चैषा षड्धातुसमुदयाद् गर्भजन्म, कर्तृकरणसंयोगात् क्रिया, कृतस्य कर्मणः फलं नाकृतस्य, नाङ्कुरोत्पत्तिरबीजात्, कर्मसदृशं फलम्, नान्यस्माद् बीजादन्योत्पत्तिरिति युक्तिः।

**प्रश्नः5– किन्नामैषणात्रयमिति चरकसंहितादिशा विवेचयत।** **(05)**

***अथवा***

**चरकसंहितायास्तिस्रैषणीयाध्यायस्य सारः स्वशब्दैर्लेखनीयः।**

## (खण्ड – ग) 25 अङ्काः

**प्रश्नः5– अधोलिखितेषु केषाञ्चन चतुर्णां श्लोकानां व्याख्या कार्या –** **(4X5=20)**

**(क)** काकैरिमांश्चित्रबर्हान् मयूरान्
पराजयेथाः पाण्डवान् धार्तराष्ट्रैः।
हित्वा सिंहान् क्रोष्टुकान् गूहमानः
प्राप्ते काले शोचिता त्वं नरेन्द्रः।।

**(ख)** अभिप्रायं यो विदित्वा तु भर्तुः
सर्वाणि कार्याणि करोत्यतन्द्री।
वक्ता हितानामनुरक्त आर्यः
शक्तिज्ञ आत्मेव हि सोऽनुकम्प्यः।।

**(ग)** अरोषणो यः समलोष्टाश्मकाञ्चनः
प्रहीणशोको गतसन्धिविग्रहः।
निन्दाप्रशंसोपरतः प्रियाप्रिये
त्यजन्नुदासीनवदेष भिक्षुकः।।

**(घ)** अनीश्वरोऽयं पुरुषो भावाभवे
सूत्रप्रोता दारुमयीव योषा।
छात्रा तु दिष्टस्य वशे कृतोऽयं
तस्माद् वद त्वं श्रवणे धृतोऽहम्।।

**(ङ)** आशा धृतिं हन्ति समृद्धिमन्तकः
क्रोधः श्रियं हन्ति यशः कदर्यता।
अपालनं हन्ति पशूंश्च राज –
न्नेकः क्रुद्धो ब्राह्मणो हन्ति राष्ट्रम।।

**(च)** प्रसादं कुरु वीराणां पाण्डवानां विशाम्पते।
दीयन्तां ग्रामकाः केचित् तेषां वृत्त्यर्थमीश्वर।।

**प्रश्नः6– विदुरनीतेः पञ्चमाध्यायस्य –** **(05)**

***अथवा***

**षष्ठाध्यायस्य सारो लेखनीयः**

---------------x---------------